# Devataganaih Kritam Devaki Stotram

# देवतागणैः कृतं देवकीस्तोत्रम्

## Document Information

Text title : Devataganaih Kritam Devaki Stotram

File name : devatAgaNaiHkRRitaMdevakIstotram.itx

Category : devii, devI, viShNupurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : viShNupurANa | adhyAya 5/2/7-21||

Latest update : October 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 2, 2024

*sanskritdocuments.org*

# देवतागणैः कृतं देवकीस्तोत्रम्

अदृष्टां पुरुषैः स्त्रीभिर्देवकीं देवतागणाः ।
बिभ्राणां वपुषा विष्णुं तुष्टुवुस्तामहर्निशम् ॥ ५-२-६ ॥

देवतागणा ऊचुः ।
प्रकृतिस्त्वपरा सुक्ष्मा ब्रह्मगर्भाभवः पुरा ।
ततो वाणी जगद्धातुर्वेदगर्भासि शोभने ॥ ५-२-७॥

सूर्यस्वरूपगर्भासि सृष्टिभूता सनातनी ।
बीजभूता तु सर्वस्य यज्ञभूताभवस्त्रयी ॥ ५-२-८॥

फलगर्भा त्वमेवेज्या वह्निगर्भा तथारणिः ।
अदितिर्देवगर्भा त्वं दैत्यगर्भा तथा दितिः ॥ ५-२-९॥

ज्योत्स्ना वासरगर्भा त्वं ज्ञानगर्भासि सन्नतिः ।
नयगर्भा परा नीतिर्लज्जा त्वं प्रश्रयोद्वहा ॥ ५-२-१०॥

कामगर्भा तथेच्छा त्वं तुष्टिः सन्तोषगर्भिणी ।
मेधा च बोधगर्भासि धैर्यगर्भोद्वहा धृतिः ॥ ५-२-११॥

ग्रहर्क्षतारकागर्भा द्यौरस्याखिलहैतुकी ।
एता विभूतयो देवि तथान्याश्च सहस्रशः ॥ ५-२-१२॥

तथासङ्ख्या जगद्धात्रि साम्प्रतं जठरे तव ।
समुद्राद्रिद्वीपवनपत्तनभूषणा ॥ ५-२-१३॥

ग्राम-खर्वट-खेटाढ्या समस्ता पृथिवी शुभे ।
समस्तवह्नयोऽम्भांसि सकलाश्च समीरणाः ॥ ५-२-१४॥

ग्रहर्क्षतारकाचित्रं विमानशतसङ्कुलम् ।
अवकाशमशेषस्य यद्ददातिनभःस्थलम् ॥ ५-२-१५॥

भूर्लोकश्च भुवर्लोकः स्वर्लोकोऽथ महर्जनः ।

तपश्च ब्रह्मलोकश्च ब्रह्माण्डमखिलं शुभे ॥ ५-२-१६॥

तदन्तरे स्थिता देवा दैत्यगन्धर्वचारणाः ।
महोरगास्तथ यक्षा राक्षसाः प्रेतगुह्यकाः ॥ ५-२-१७॥

मनुष्याः पशवश्चान्ये ये च जीवा यशस्विनि ।
तैरन्तःस्थैरनन्तोऽसौ सर्वेशः सर्वभावनः ॥ ५-२-१८॥

रूपकर्मस्वरूपाणि न परिच्छेदगोचरे ।
यस्याखिलप्रमाणानि स विष्णुर्गर्भगस्तव ॥ ५-२-१९॥

त्वं स्वाहा त्वं स्वधा विद्या सुधा त्वं ज्योतिरम्बरे ।
त्वं सर्वलोकरक्षार्थमवतीर्णा महीतले ॥ ५-२-२०॥

प्रसीद देवि सर्वस्य जगतः शं शुभे कुरु ।
प्रीत्या त्वं धारयेशानं धृतं येनाखिलं जगत् ॥ ५-२-२१॥

इति विष्णुपुराणे पञ्चमभागे द्वितीयाध्यायान्तर्गतं
देवतागणैः कृतं देवकीस्तोत्रं समाप्तम् ।

विष्णुपुराण । अध्याय ५/२/७-२१ ॥

viShNupurANa . adhyAya 5/2/7-21..

Proofread by PSA Easwaran

*Devataganaih Kritam Devaki Stotram*
pdf was typeset on October 2, 2024

Please send corrections to *sanskrit@cheerful.com*